# उपसंहारः

# उपसंहारः

संस्कृतवा›मये नैकानिशास्त्राणि प्रसिद्धाानि सन्ति। तत्र वैदिकसाहित्यस्य रहस्यं तेषु शास्त्रेषु समाविष्टमस्ति। धर्मादिपुरुषार्थ–चतुष्टयप्राप्तये वैदिकसम्प्रदायाः अपि प्रसिद्धाः सन्ति। शास्त्रेषु पुरुषार्थप्राप्त्यर्थम् अनेके उपायाः कथिताः। तेषु उपायेषु कर्मकाण्डोऽपि एकः वर्तते। अनेन कारणेन सर्वे सम्प्रदायाचार्यैः शंकराचार्यप्रभृतिभिः कर्मकाण्डविषयः स्वीकृतः। सम्प्रति सम्प्रदायभेदेन वैदिककर्मकाण्डस्वरूपं कीदृशमस्ति इति जिज्ञासया अस्य शोधविषयस्य सन्दर्भोवर्तते।

प्रायेण वैदिकसम्प्रदायाचार्यैः (शांकर–रामानुज–मध्व–निम्बार्क–वल्लभाचार्यैः) वैदिककर्मकाण्डं स्वीकृतमस्ति। तथापि कैश्चित वैष्णवैः विशिष्टक्रिया स्वीकृतास्ति। अत्र वल्लभसम्प्रदाये कर्मकाण्डस्य स्वरूपं, मळतवं च कथमस्ति इति विषयं स्वीकृत्य शोधप्रबन्धोऽयं सम्पादिता।

प्रथमे हि सम्प्रदायविषयका चिन्तनम् सम्प्रदायस्य वैशिष्ट्यं, सम्प्रदायस्य महत्वं, सम्प्रदायस्य वैविध्यं च विवेचितमस्ति।

भगवतः यानि स्वरूपाणि सन्ति तेषां स्वरूपाणां सर्वत्रैव पूजनम्, अर्चनम्, न भवति अपि च स्वाचार्ययांज्ञया यस्य पूजनं, वन्दनं, यााागादि च निर्दिष्टं वर्तते तदेव सम्प्रदाये कुर्वन्ति जनाः।

अत्र मया कर्मकाण्डस्य वैदिकस्वरूपं किमस्ति, पौराणिकस्वरूपं किमस्ति इत्यपि लिखितमस्ति। वेदेषु कर्मकाण्डविषयकाः मन्त्राः के सन्ति तत्र ब्राह्मणग्रन्थेषु कर्मकाण्डस्य स्वरूपं किमुपलब्धम् वर्तते इति सर्वं विविच्य पुराणेष्वपि कर्मकाण्डस्य विषयिकी का पद्धतिः इत्यपि निर्दिष्टाः।

विषयवस्तोः सम्यग्रूपेण संशोधनाय अत्र पञ्चसु अध्यायेषु विभक्तः वर्तते। अत्र अध्यायायनुसारेण विषयसारांशः प्रस्तूयते।

**प्रथमे—प्रकरणे** शुद्धाद्वैतसम्प्रदायस्य परिचयः लिखितः। ततः तत्सम्प्रदायस्य किं महत्वं अस्ति ? एतदपि विवेचितम्। यस्य कस्यापि वस्तुनः सिद्धान्तस्य वा वैशिष्ट्य ंन स्यात् तावत् तन्महत्वं अपि न भवति। अतएव अस्य सम्प्रदायस्य वैशिष्ट्यं स्वरूपं व अस्मिन्नेव प्रकरणे प्रकटितम्।

**द्वितीयं—प्रकरणं** कर्मकाण्डविषयकं वर्तते। अत्र वैदिकसंहिताषु कर्मकाण्डविचारः विनिवेशः कृतः। ततः परं मन्त्रब्रह्मणर्योवेदः इत्याधारेण ब्राह्मणारण्यकोपनिषत्सु कर्मकाण्डविचारः कर्मकाण्डविषयकं किमस्ति, अस्मिन् विषये अत्र विचाारः कृतः। ततः परं सूत्रग्रन्थानामपि कर्मकाण्डे अतीवमहत्वं परिदृश्यते। अत एव सूत्रग्रन्थेषु कर्मकाण्डस्य किं स्वरूपं एतद् वर्णनं कृतम्। वैदिकवा›मयस्योपरान्ते पुराणेषु कर्मकाण्डविषयकं विपुलं साहित्यवर्णनं च प्राप्यते। अनेनकारणेन पुराणेषु कर्मकाण्डविचारः अत्र कृतः।

**तृतीये—प्रकरणे** कर्माकण्डस्य महत्वस्य वर्णनमस्ति। अत्र संहिता—ग्रन्थेभ्यः मन्त्राणां कर्मकाण्डे कः उपयोगः, दार्शनिक दृष्ट्या अस्य किं महत्त्वम् इति विविच्य धार्मिकदृष्ट्याऽपि कर्मकाण्डस्य महत्त्वं प्रकटितम्। ततः परं आध्यात्मिक दृष्ट्यापि कर्मकाण्डस्य महत्वम् इति विविच्य लौकिक दृष्टया अस्य स्वरूपस्य वृहदरूपेण उल्लिखितम्। सर्वेषु सम्प्रदायेषु कर्मकाण्डस्य पौरोहित्यस्य च उपयोगिता दरीदृश्यते। तथापि अत्र शुद्धाद्वैत सम्प्रदाये यत् परिमाणं कर्मकाण्डस्य ग्रहीतम्।

अस्य विवेचनावसरे **चतुर्थ—प्रकरणं** लिखितम्। प्रकरणेऽस्मिन् शुद्धाद्वैतसम्प्रदाये कानि कर्माणि भवन्ति इति सोदाहरणं लिखित्वा तं सम्प्रदाये के के विविधोत्सवाः भवन्ति, क्रियते च तथा च विविधव्रतानां तत्पूजनानां च विवेचनमपि अत्र उपस्थापितम्। एतेषु सर्वेषु क्रमेषु च पूजनक्रमः कया पद्धतया ग्रहीता अस्यापि निदर्शनं कृतम्। अनेन सह तस्य

वैदिकपद्धतिः का ? केन वेदेन परिपुष्टम् अस्ति, इत्यपि अत्र लिखितम् अस्ति।

**पर्यन्ते पञ्चमं–प्रकरणम्** अस्ति। यत्र शुद्धाद्वैतसम्प्रदाये कर्मकाण्डस्य मीमांसा कृता अस्ति। यत्र मीमांसासम्प्रदाये कर्मकाण्डस्य किं स्वरूपं इति विविच्य कर्मकाण्डस्य वर्तमानस्वरूपं किमस्ति इत्यपि उल्लिख्य कर्मकाण्डविषये विविधाचार्याणां मतमपि उपस्थापितम्।

ततः परं अस्य शोधप्रबन्धस्य निष्कर्षः लिखितम् अस्ति। परिशिष्टरूपेण आधारग्रन्थानां निदर्शनमपि च कर्मकाण्डे प्रयुक्तपारिभाषिक –शब्दानां अर्थाः अपि लिखिताः सन्ति।